श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

श्री कूरं तिरुवाळि नरसिंह दासेन कृता

# ॥ नवरत्नमाला ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ नवरत्नमाला ॥

काषाय दण्ड मुद्धृत्य विलसच्छ्रीमदाण्डवः।
श्रीमुष्ण जनितः श्रीमान् श्रेष्ठो वैष्णव पालने॥ १ ॥

ज्ञानेन यज्ञ तपसा शिष्यान् शास्ति च यो गुरुः।
तमहं शिरसा वन्दे श्रीमदाण्डव मामुनिम्॥ २ ॥

वेद वेदान्त विद्यासु निष्णातो मुनिपुङ्गवः।
सतां सदसि रक्तोऽयं रङ्गरामानुजो यतिः॥ ३ ॥

दर्शने सूर्यवत् भाति भाषणे स्वामिदेशिकः।
सौहार्दे भाष्यकारोऽयं श्रीमदाण्डव मामुनिः॥ ४ ॥

प्रपञ्चे सर्व दिग्भागे वर्तन्ते शिष्य कोटयः।
ते सर्वे स्वामिनं यान्ति जन्म साफल्यसिद्धये॥ ५ ॥

कल्याण कार्य कर्तारं साधु सज्जन पोषकम्।
मानवोद्धरणे मग्नं यतिराजमहं भजे॥ ६ ॥

वेद वेदान्त विदुषं पादुकाराधने रतम्।
ज्ञानिनामग्रगण्यं तम् अपरं देशिकं भजे॥ ७ ॥

कायेन मनसा वाचा नित्यं पादाऽभिवन्दनम्।
त्वय्यर्पितमनो बुद्धिं देहि मे मुनिपुङ्गव॥ ८ ॥

वन्दे वैष्णव पोषकं यतिवरं सर्वार्थसिद्धिप्रदम्
शिष्याणां हृदयङ्गमं गुणनिधिं शास्त्रार्थ सद्बोधकम्।
दीनानां हितकारकं शुभकरं लोके हितार्थ प्रदम्
आरुद्रा जनितं मुनित्रयमुनिं रङ्गेति नामाङ्कितम्॥ ९ ॥

॥ इति नवरत्नमाला समाप्ता ॥